# Gargakritam Shri Krishna Stotram

# ગર્ગકૃતં શ્રીકૃષ્ણસ્તોત્રમ્

## Document Information

Text title : Gargakritam Shri Krishna Stotram

File name : gargakRRitaMshrIkRRiShNastotram.itx

Category : vishhnu, vishnu, krishna, brahmavaivartapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : brahmavaivartapurANa | shrIkRRiShNajanma, pUrvabhAga | adhyAya 13/194-214||

Latest update : March 22, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 22, 2025

*sanskritdocuments.org*

Gargakritam Shri Krishna Stotram

# ગર્ગકૃતં શ્રીકૃષ્ણસ્તોત્રમ્

ગર્ગ ઉવાચ ।
હે કૃષ્ણ જગતાં નાથ ભક્તાનાં ભયભઞ્જન ।
પ્રસન્નો ભવ મામીશ દેહિ દાસ્યં પદામ્બુજે ॥ ૧૯૩॥

ત્વત્પિત્રા મે ધનં દત્તં તેન મે કિં પ્રયોજનમ્ ।
દેહિ મે નિશ્ચલાં ભક્તિં ભક્તાનામભયપ્રદ ॥ ૧૯૪॥

અણિમાદિકસિદ્ધિષુ યોગેષુ મુક્તિષુ પ્રભો ।
જ્ઞાનતત્ત્વેઽમરત્વે વા કિઞ્ચિન્નાસ્તિ સ્પૃહા મમ ॥ ૧૯૫॥

ઇન્દ્રત્વે વા મનુત્વે વા સ્વર્ગલોકફલે ચિરમ્ ।
નાસ્તિ મે મનસો વાઞ્છા ત્વત્પાદસેવનં વિના ॥ ૧૯૬॥

સાલોક્યં સાર્ષ્ટિસારૂપ્યે સામીપ્યૈકત્વમીપ્સિતમ્ ।
નાહં ગૃહ્ણામિ તે બ્રહ્મંસ્ત્વત્પાદસેવનં વિના ॥ ૧૯૭॥

ગોલોકે વાપિ પાતાલે વાસે નાસ્તિ મનોરથઃ ।
કિન્તુ તે ચરણામ્ભોજે સન્તતં સ્મૃતિરસ્તુ મે ॥ ૧૯૮॥

ત્વન્મન્ત્રં શઙ્કરાત્પ્રાપ્ય કતિજન્મફલોદયાત્ ।
સર્વજ્ઞોઽહં સર્વદર્શી સર્વત્ર ગતિરસ્તુ મે ॥ ૧૯૯॥

કૃપાં કુરુ કૃપાસિન્ધો દીનબન્ધો પદામ્બુજે ।
રક્ષ મામભયં દત્ત્વા મૃત્યુર્મે કિં કરિષ્યતિ ॥ ૨૦૦॥

સર્વેષામીશ્વરઃ સર્વસ્ત્વત્પાદામ્ભોજસેવયા ।
મૃત્યુઞ્જયોઽન્તકાલશ્ચ બભૂવ યોગિનાં ગુરુઃ ॥ ૨૦૧॥

બ્રહ્મા વિધાતા જગતાં ત્વત્પાદામ્ભોજસેવયા ।
યસ્યૈકદિવસે બ્રહ્મન્પતન્તીન્દ્રાશ્ચતુર્દશ ॥ ૨૦૨॥

ત્વત્પાદસેવયા ધર્મઃ સાક્ષી ચ સર્વકર્મણામ્ ।

પાતા ચ ફલદાતા ચ જિત્વા કાલં સુદુર્જયમ્ ॥ ૨૦૩॥

સહસ્રવદનઃ શેષો યત્પાદામ્બુજસેવયા ।
ધત્તે સિદ્ધાર્થવદ્વિશ્વં શિવઃ કણ્ઠે વિષં યથા ॥ ૨૦૪॥

સર્વસમ્પદ્વિધાત્રી યા દેવીનાં ચ પરાત્પરા ।
કરોતિ સતતં લક્ષ્મીઃ કેશૈસ્ત્વત્પાદમાર્જનમ્ ॥ ૨૦૫॥

પ્રકૃતિર્બીજરૂપા સા સર્વેષાં શક્તિરૂપિણી ।
સ્મારંસ્મારં ત્વત્પદાબ્જં બભૂવ તત્પરાવરા ॥ ૨૦૬॥

પાર્વતી સર્વરૂપા સા સર્વેષાં બુદ્ધિરૂપિણી ।
ત્વત્પાદસેવયા કાન્તં લલાભ શિવમીશ્વરમ્ ॥ ૨૦૭॥

વિદ્યાધિષ્ઠાત્રી દેવી યા જ્ઞાનમાતા સરસ્વતી ।
પૂજ્યા બભૂવ સર્વેષાં સમ્પૂજ્ય ત્વત્પદામ્બુજમ્ ॥ ૨૦૮॥

સાવિત્રી વેદજનની પુનાતિ ભુવનત્રયમ્ ।
બ્રહ્મણો બ્રાહ્મણાનાં ચ ગતિસ્ત્વત્પાદસેવયા ॥ ૨૦૯॥

ક્ષમા જગદ્વિભર્તું ચ રત્નગર્ભા વસુન્ધરા ।
પ્રસૂતિઃ સર્વસસ્યાનાં ત્વત્પાદપદ્મસેવયા ॥ ૨૧૦॥

રાધા મમાંશસમ્ભૂતા તવ તુલ્યા ચ તેજસા ।
સ્થિત્વા વક્ષસિ તે પાદં સેવતેઽન્યસ્ય કા કથા ॥ ૨૧૧॥

યથા શર્વાદયો દેવા દેવ્યઃ પદ્માદયો યથા ।
સનાથં કુરુ મામીશ ઈશ્વરસ્ય સમા કૃપા ॥ ૨૧૨॥

ન યાસ્યામિ ગૃહં નાથ ન ગૃહ્ણામિ ધનં તવ ।
કૃત્વા માં રક્ષ પાદાબ્જસેવાયાં સેવકં રતમ્ ॥ ૨૧૩॥

ઇતિ સ્તુત્વા સાશ્રુનેત્રઃ પપાત ચરણે હરેઃ ।
રુરોદ ચ ભૃશં ભક્ત્યા પુલકાઞ્ચિતવિગ્રહઃ ॥ ૨૧૪॥

ઇતિ શ્રીબ્રહ્મવૈવર્તપુરાણે શ્રીકૃષ્ણજન્મખણ્ડે પૂર્વે ત્રયોદશાધ્યાયાન્તર્ગતં
ગર્ગકૃતં શ્રીકૃષ્ણસ્તોત્રં સમાપ્તમ્ ।

બ્રહ્મવૈવર્તપુરાણ । શ્રીકૃષ્ણજન્મ, પૂર્વભાગ । અધ્યાય ૧૩/૧૯૪-૨૧૪॥

brahmavaivartapurANa . shrIkRRiShNajanma, pUrvabhAga . adhyAya 13/194-214..

Proofread by PSA Easwaran

*Gargakritam Shri Krishna Stotram*

pdf was typeset on March 22, 2025

Please send corrections to *sanskrit@cheerful.com*